# Shri Raghava Yadaviyam (kavi venkaTAdhvari)

# શ્રીરાઘવયાદવીયમ્ (કવિ વેંકટાધ્વરિ)

## Document Information

Text title : rAghava yAdavIyaM (kavi ve.nkaTAdhvari)

File name : raaghavayaadaviya.itx

Category : raama

Location : doc_raama

Transliterated by : P. P. Narayanaswami swami at math.mun.ca

Proofread by : P. P. Narayanaswami swami at math.mun.ca

Latest update : November 1, 2010, October 8, 2016

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 10, 2019

*sanskritdocuments.org*

# શ્રીરાઘવયાદવીયમ્ (કવિ વેંકટાધ્વરિ)

વંદેऽહં દેવં તં શ્રીતં રન્તારં કાલં ભાસા યઃ ।
રામો રામાધીરાપ્યાગો લીલામારાયોધ્યે વાસે ॥ ૧॥

વિલોમમ્
સેવાધ્યેયો રામાલાલી ગોપ્યારાધી મારામોરાઃ ।
યસ્સાભાલંકારં તારં તં શ્રીતં વન્દેऽહં દેવમ્ ॥ ૧॥

સાકેતાખ્યા જ્યાયામાસીદ્યાવિપ્રાદીપ્તાર્યાધારા ।
પૂરાજીતાદેવાદ્યાવિશ્વાસાગ્ર્યાસાવાશારાવા ॥ ૨॥

વિલોમમ્
વારાશાવાસાગ્ર્યા સાશ્વાવિદ્યાવાદેતાજીરાપૂઃ ।
રાધાર્યપ્તા દીપ્રાવિદ્યાસીમાયાજ્યાખ્યાતાકેસા ॥ ૨॥

કામભારસ્સ્થલસારશ્રીસૌધાસૌઘનવાપિકા ।
સારસારવપીનાસરાગાકારસુભૂરુભૂઃ ॥ ૩॥

વિલોમમ્
ભૂરિભૂસુરકાગારાસનાપીવરસારસા ।
કાપિવાનઘસૌધાસૌ શ્રીરસાલસ્થભામકા ॥ ૩॥

રામધામસમાનેનમાગોરોધનમાસતામ્ ।
નામહામક્ષરરસં તારાભાસ્તુ ન વેદ યા ॥ ૪॥

વિલોમમ્
યાદવેનસ્તુભારાતાસંરરક્ષમહામનાઃ ।
તાં સમાનધરોગોમાનનેમાસમધામરાઃ ॥ ૪॥

યન્ ગાધેયો યોગી રાગી વૈતાને સૌમ્યે સૌખ્યેસૌ ।
તં ખ્યાતં શીતં સ્ફીતં ભીમાનામાશ્રીહાતા ત્રાતમ્ ॥ ૫॥

વિલોમમ્

તં ત્રાતાહાશ્રીમાનામાભીતં સ્ફીત્તં શીતં ખ્યાતં ।
સૌખ્યે સૌમ્યેસૌ નેતા વૈ ગીરાગીયો યોધેગાયન્ ॥ ૫॥

મારમં સુકુમારાભં રસાજાપનૃતાશ્રિતં ।
કાવિરામદલાપાગોસમાવામતરાનતે ॥ ૬॥

વિલોમમ્

તેન રાતમવામાસ ગોપાલાદમરાવિકા ।
તં શ્રિતાનૃપજાસારંભ રામાકુસુમં રમા ॥ ૬॥

રામનામા સદા ખેદભાવે દયા-
વાનતાપીનતેજારિપાવનતે ।
કાદિમોદાસહાતાસ્વભાસારસા-
મેસુગોરેણુકાગાત્રજે ભૂરુમે ॥ ૭॥

વિલોમમ્

મેરુભૂજેત્રગાકાણુરેગોસુમે-
સારસા ભાસ્વતાહાસદામોદિકા ।

તેન વા પારિજાતેન પીતા નવા
યાદવે ભાદખેદાસમાનામરા ॥ ૭॥

સારસાસમધાતાક્ષિભૂમ્નાધામસુ સીતયા ।
સાધ્વસાવિહરેમેક્ષેમ્યરમાસુરસારહા ॥ ૮॥

વિલોમમ્

હારસારસુમારમ્યક્ષેમેરેહવિસાધ્વસા ।
યાતસીસુમધામ્નાભૂક્ષિતાધામસસારસા ॥ ૮॥

સાગસાભરતાયેભમાભાતામન્યુમત્તયા ।
સાત્રમધ્યમયાતાપેપોતાયાધિગતારસા ॥ ૯॥

વિલોમમ્

સારતાગધિયાતાપોપેતાયામધ્યમત્રસા ।
યાત્તમન્યુમતાભામા ભયેતારભસાગસા ॥ ૯॥

તાનવાદપકોમાભારામેકાનનદાસસા ।
યાલતાવૃદ્ધસેવાકાકૈકેયીમહદાહહ ॥ ૧૦॥

વિલોમમ્

હહદાહમયીકેકૈકાવાસેદ્ધ્વૃતાલયા ।
સાસદાનનકામેરાભામાકોપદવાનતા ॥ ૧૦॥

વરમાનદસત્યાસહ્રીતપિત્રાદરાદહો ।
ભાસ્વરસ્થિરધીરોપહારોરાવનગામ્યસૌ ॥ ૧૧॥

વિલોમમ્

સૌમ્યગાનવરારોહાપરોધીરસ્સ્થિરસ્વભાઃ ।
હોદરાદત્રાપિતહ્રીસત્યાસદનમારવા ॥ ૧૧॥

યાનયાનઘધીતાદા રસાયાસ્તનયાદવે ।
સાગતાહિવિયાતાહ્રીસતાપાનકિલોનભા ॥ ૧૨॥

વિલોમમ્

ભાનલોકિનપાતાસહ્રીતાયાવિહિતાગસા ।
વેદયાનસ્તયાસારદાતાધીઘનયાનયા ॥ ૧૨॥

રાગિરાધુતિગર્વાદારદાહોમહસાહહ ।
યાનગાતભરદ્વાજમાયાસીદમગાહિનઃ ॥ ૧૩॥

વિલોમમ્

નોહિગામદસીયામાજદ્વારભતગાનયા ।
હહ સાહમહોદારદાર્વાગતિધુરાગિરા ॥ ૧૩॥

યાતુરાજિદભાભારં દ્યાં વમારુતગન્ધગમ્ ।
સોગમારપદં યક્ષતુંગાભોનઘયાત્રયા ॥ ૧૪॥

વિલોમમ્

યાત્રયાઘનભોગાતું ક્ષયદં પરમાગસઃ ।
ગન્ધગંતરુમાવદ્યં રંભાભાદજિરા તુ યા ॥ ૧૪॥

દણ્ડકાં પ્રદમોરાજાલ્યાહતામયકારિહા ।
સસમાનવતાનેનોભોગ્યાભોનતદાસન ॥ ૧૫॥

વિલોમમ્

નસદાતનભોગ્યાભો નોનેતાવનમાસ સઃ ।
હારિકાયમતાહલ્યાજારામોદપ્રકાણ્ડદમ્ ॥ ૧૫॥

સોરમારદનજ્ઞાનોવેદેરાકણ્ઠકુંભજમ્ ।
તં દ્રુસારપટોનાગાનાનાદોષવિરાધહા ॥ ૧૬॥

વિલોમમ્
હાધરાવિષદોનાનાગાનાટોપરસાદ્રુતમ્ ।
જમ્ભકુણ્ઠકરાદેવેનોજ્ઞાનદરમારસઃ ॥ ૧૬॥

સાગમાકરપાતાહાકંકેનાવનતોહિસઃ ।
ન સમાનર્દમારામાલંકારાજસ્વસા રતમ્ ॥ ૧૭॥

વિલોમમ્
તં રસાસ્વજરાકાલંમારામાર્દનમાસન ।
સહિતોનવનાકેકં હાતાપારકમાગસા ॥ ૧૭॥

તાં સ ગોરમદોશ્રીદો વિગ્રામસદરોતત ।
વૈરમાસપલાહારા વિનાસા રવિવંશકે ॥ ૧૮॥

વિલોમમ્
કેશવં વિરસાનાવિરાહાલાપસમારવૈઃ ।
તતરોદસમગ્રાવિદોશ્રીદોમરગોસતામ્ ॥ ૧૮॥

ગોદ્યુગોમસ્વમાયોભૂદશ્રીગખરસેનયા ।
સહસાહવધારોવિકલોરાજદરાતિહા ॥ ૧૯॥

વિલોમમ્
હાતિરાદજરાલોકવિરોધાવહસાહસ ।
યાનસેરખગશ્રીદ ભૂયોમાસ્વમગોદ્યુગઃ ॥ ૧૯॥

હતપાપચયેહેયો લંકેશોયમસારધીઃ ।
રાજિરાવિરતેરાપોહાહાહંગ્રહમારઘઃ ॥ ૨૦॥

વિલોમમ્
ઘોરમાહગ્રહંહાહાપોરાતેરવિરાજિરાઃ ।
ધીરસામયશોકેલં યો હેયે ચ પપાત હ ॥ ૨૦॥

તાટકેયલવાદેનોહારીહારિગિરાસમઃ ।
હાસહાયજનાસીતાનાપ્તેનાદમનાભુવિ ॥ ૨૧॥

વિલોમમ્
વિભુનામદનાપ્તેનાતાસીનાજયહાસહા ।
સસરાગિરિહારીહાનોદેવાલયકેટતા ॥ ૨૧॥

ભારમાકુદશાકેનાશરાધીકુહકેનહા ।
ચારુધીવનપાલોક્યા વૈદેહીમહિતાહૃતા ॥ ૨૨॥

વિલોમમ્
તાહૃતાહિમહીદેવ્યૈક્યાલોપાનવધીરુચા ।
હાનકેહકુધીરાશાનાકેશાદકુમારભાઃ ॥ ૨૨॥

હારિતોયદભોરામાવિયોગેનઘવાયુજઃ ।
તંરુમામહિતોપેતામોદોસારજ્ઞરામયઃ ॥ ૨૩॥

વિલોમમ્
યોમરાજ્ઞરસાદોમોતાપેતોહિમમારુતમ્ ।
જોયુવાઘનગેયોવિમારાભોદયતોરિહા ॥ ૨૩॥

ભાનુભાનુતભાવામાસદામોદપરોહતં ।
તંહતામરસાભક્ષોતિરાતાકૃતવાસવિમ્ ॥ ૨૪॥

વિલોમમ્
વિંસવાતકૃતારાતિક્ષોભાસારમતાહતં ।
તં હરોપદમોદાસમાવાભાતનુભાનુભાઃ ॥ ૨૪॥

હંસજારુદ્ધબલજાપરોદારસુભાજિનિ ।
રાજિરાવણરક્ષોરવિઘાતાયરમારયમ્ ॥ ૨૫॥

વિલોમમ્
યં રમારયતાઘાવિરક્ષોરણવરાજિરા ।
નિજભાસુરદારોપજાલબદ્ધરુજાસહમ્ ॥ ૨૫॥

સાગરાતિગમાભાતિનાકેશોસુરમાસહઃ ।
તંસમારુતજંગોપ્તાભાદાસાદ્યગતોગજમ્ ॥ ૨૬॥

વિલોમમ્
જંગતોગદ્યસાદાભાપ્તાગોજંતરુમાસતં ।
હસ્સમારસુશોકેનાતિભામાગતિરાગસા ॥ ૨૬॥

વીરવાનરસેનસ્ય ત્રાતાભાદવતા હિ સઃ ।
તોયધાવરિગોયાદસ્યયતોનવસેતુના ॥ ૨૭॥

વિલોમમ્
નાતુસેવનતોયસ્યદયાગોરિવધાયતઃ ।
સહિતાવદભાતાત્રાસ્યનસેરનવારવી ॥ ૨૭॥

હારિસાહસલંકેનાસુભેદીમહિતોહિસઃ ।
ચારુભૂતનુજોરામોરમારાધયદાર્તિહા ॥ ૨૮॥

વિલોમમ્
હાર્તિદાયધરામારમોરાજોનુતભૂરુચા ।
સહિતોહિમદીભેસુનાકેલંસહસારિહા ॥ ૨૮॥

નાલિકેરસુભાકારાગારાસૌસુરસાપિકા ।
રાવણારિક્ષમેરાપૂરાભેજે હિ નનામુના ॥ ૨૯॥

વિલોમમ્
નામુનાનહિજેભેરાપૂરામેક્ષરિણાવરા ।
કાપિસારસુસૌરાગારાકાભાસુરકેલિના ॥ ૨૯॥

સાગ્ર્યતામરસાગારામક્ષામાઘનભારગૌઃ ॥

નિજદેપરજિત્યાસ શ્રીરામે સુગરાજભા ॥ ૩૦॥

વિલોમમ્
ભાજરાગસુમેરાશ્રીસત્યાજિરપદેજનિ ।
ગૌરભાનઘમાક્ષામરાગાસારમતાગ્ર્યસા ॥ ૩૦॥

॥ ઇતિ શ્રીવેઙ્કટાધ્વરિકૃતં શ્રીરાઘવયાદવીયં સમાપ્તમ્ ॥

Encoded and proofread by P . P . Narayanaswami at swami at math.mun.ca

*Shri Raghava Yadaviyam (kavi venkaTAdhvari)*
pdf was typeset on December 10, 2019

Please send corrections to *sanskrit@cheerful.com*